# मूलरामायणम्



चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ।। 1.1.32 ।।
राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।

पदच्छेदः – चित्रकूटं गते रामे पुत्रशोकातुरः तदा राजा दशरथः स्वर्गं जगाम विलपन् सुतम्

पदपरिचयः –
चित्रकूटं गते रामे = यदा श्रीरामः चित्रकूटं गतवान्
पुत्रशोकातुरः तदा = तदा पुत्रस्य वियोग-दुःखात् पीडितः
राजा दशरथः = दशरथ-महाराजः
स्वर्गं जगाम = स्वर्ग-लोकं गतवान्
विलपन् सुतम् = पुत्रं रामं विचिन्त्य “हा राम, हा राम” इति विलापं कुर्वन्

चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ।। 1.1.32 ।।
राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।

पुत्रस्य शोकः = पुत्रशोकः (ष.तत्)

पुत्रशोकेन आतुरः = पुत्रशोकातुरः (तृ.तत्)

आ+तुर् (त्वरणे) = आतुरः

राजते (शोभते) इति राजा

वि + लप् (व्यक्तायां वाचि) +शतृ = विलपन्

जगाम = गम् +लिट् प्र.पु.ए.

स्वः, स्वर्गः, नाकः त्रिदिवः त्रिदशालयः, सुरलोकः द्यौ, त्रिविष्टपम् – अमरः

व्याधितः, अभ्यमितः, आमयावी, व्याधितः, विकृतः, आतुरः अपटुः - अमरः

अन्वयः
रामे चित्रकूटं गते (सति) पुत्रशोकातुरः राजा दशरथः तदा सुतं विलपन् स्वर्गं जगाम

# रामायणे अयं सन्दर्भः

चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते |

दूता वैवस्वतस्य एते कौसल्ये त्वरयन्ति माम् || २-६४-६६

अतः तु किम् दुःखतरम् यदहम् जीवितक्षये |

न हि पश्यामि धर्मज्ञम् रामम् सत्यपराक्रमम् || २-६४-६७

तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः |

उच्छोषयति मे प्राणान् वारिस्तोकमिवातपः || २-६४-६८

अयम् आत्मभवः शोको माम् अनाथम् अचेतनम् |

संसादयति वेगेन यथा कूलं नदीरयः || २-६४-७५

# रामायणे अयं सन्दर्भः

हा राघव महा बाहो हा मम आयासनाशन ।

हा पितृप्रिय मे नाथ हाद्य क्वासि गतः सुत ।। २-६४-७६

हा कौसल्ये नशिष्यामि हा सुमित्रे तपस्विनि ।

हा नृशंसे ममामित्रे कैकेयि कुलपांसिनि ।। २-६४-७७

यथा तु दीनं कथयन् नराधिपः ।

प्रियस्य पुत्रस्य विवासनातुरः ।

गते अर्धरात्रे भृशं दुःखपीडितः ।

तदा जहौ प्राणम् उदार-दर्शनः ।। २-६४-७९

# सति-सप्तमी / भाव-सप्तमी

| ज्ञापक-क्रिया | ज्ञाप्यक्रिया |
| --- | --- |
| → रामे चित्रकूटं <u>गते</u> | दशरथः प्राणान् त्यक्तवान् । |
| → बालके विद्यालयं <u>प्राप्ते</u> | शिक्षकः आहूतवान् । |
| → पितरि कार्यालयं <u>प्राप्ते</u> | पत्रं प्राप्तवान् । |

क्रियाश्रयस्य सप्तमी-विभक्तिः

# सति-सप्तमी / भाव-सप्तमी

रामः गङ्गाकूलं प्राप्तः गुहेन सह मिलितः ।

रामे गङ्गाकूलं प्राप्ते गुहेन सह मिलितः ।

दशरथः विवासम् आज्ञापितवान् रामः वनं प्रति प्रस्थितवान् ।

दशरथे विवासम् आज्ञापितवति रामः वनं प्रति प्रस्थितवान् ।

दशरथः स्वर्गं गतवान् वसिष्ठः भरतम् आहूतवान् ।

दशरथे स्वर्गं गतवति वसिष्ठः भरतम् आहूतवान् ।

भरतः अयोध्याम् आगतः दशरथस्य अन्तिमक्रिया सम्पन्ना ।

भरते अयोध्याम् आगते दशरथस्य अन्तिमक्रिया सम्पन्ना ।

गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ।। 1.1.33 ।।
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।

पदच्छेदः – गते तु तस्मिन् भरतः वसिष्ठ-प्रमुखैः द्विजैः नियुज्यमानः राज्याय न ऐच्छत् राज्यं महाबलः

पदपरिचयः –
गते तु तस्मिन् = दशरथः यदा पञ्चत्वं प्राप्तवान् तदा
भरतः = कैकेयी-तनयः
वसिष्ठप्रमुखैः = वसिष्ठस्य प्रधानतया
द्विजैः = ब्राह्मणैः
नियुज्यमानः राज्याय = राज्यं कर्तुं प्रेर्यमाणः
न ऐच्छत् राज्यं = राज्यभारं वोढुं न इष्टवान्
महाबलः = पराक्रमी

गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ।। 1.1.33 ।।
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।

वसिष्ठः प्रमुखः येषां तैः = वसिष्ठप्रमुखैः (बहु.व्री)

द्वाभ्यां जन्म-संस्काराभ्यां जायन्ते इति द्विजाः तैः = द्विजैः

नि + युज् + शानच् = नियुज्यमानः

इष् + लङ् = ऐच्छत् (प्र.ए)

महत् बलं यस्य सः महाबलः (बहु.व्री)

अन्वयः
तस्मिन् गते तु वसिष्ठ-प्रमुखैः द्विजैः राज्याय नियुज्यमानः महाबलः भरतः राज्यं न ऐच्छत् ।

स जगाम वनं वीरो रामपादप्रसादकः ॥ 1.1.34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

पदच्छेदः – सः जगाम वनं वीरः राम-पाद-प्रसादकः गत्वा तु सः महात्मानं रामं सत्यपराक्रमम् अयाचत् भ्रातरं रामम् आर्य-भाव-पुरस्कृतः त्वम् एव धर्मज्ञः इति रामं वचः अब्रवीत्

स जगाम वनं वीरो रामपादप्रसादकः ॥ 1.1.34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

पदपरिचयः –

सः जगाम वनं वीरः = महाबलशाली सः भरतः वनं गतवान्
राम-पाद-प्रसादकः = राम-चरण-सेवकः
गत्वा तु सः महात्मानं रामं = सः भरतः वनं गत्वा उदारचरितं राघवं
सत्यपराक्रमं = सत्ये निष्ठावन्तं
अयाचत् भ्रातरं रामम् = अग्रजं रामचन्द्रं प्रार्थितवान्
आर्य-भाव-पुरस्कृतः = श्रेष्ठ-गुण-सम्पन्नः
त्वमेव राजा धर्मज्ञ इति = “भवान् एव धर्मज्ञः राजा भवितुं योग्यः” –इत्येवम्
वचः अब्रवीत् = वचनम् उक्तवान्

स जगाम वनं वीरो रामपादप्रसादकः ॥ 1.1.34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

रामस्य पादौ = रामपादौ (ष.तत्)

रामपादौ प्रसादयति इति = रामपादप्रसादकः (उपपद)

महान् आत्मा यस्य सः, तम् = महात्मानम्

सत्यः पराक्रमः यस्य सः, तम् = सत्यपराक्रमम्

आर्यस्य भावः = आर्यभावः (ष.तत्)

आर्यभावेन पुरस्कृतः = आर्यभावपुरस्कृतः (तृ.तत्)

पुरस्+कृ+क्त= पुरस्कृत (पुरस्-अव्ययम्)

धर्मं जानाति इति = धर्मज्ञः (उपपद.कर्म)

अयाचत् (याचृ)- उभयपदी – प्रपु.ए

ब्रू(उभय)+लङ् (प्र.ए) = अब्रवीत्

स जगाम वनं वीरो रामपादप्रसादकः ॥ 1.1.34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

**जगाम**

कः
सः (भरतः)
सः कीदृशः
वीरः,
रामपादप्रसादकः
कुत्र?
वनं

**अयाचत्**

कः अयाचत् ?
सः
कीदृशः सः
आर्य-भाव-पुरस्कृतः
कम् अयाचत् ?
रामम्

कीदृशं रामम्?
महात्मानं,
सत्यपराक्रमम्
भ्रातरम्
किं कृत्वा?
गत्वा (चित्रकूटम्)

**अब्रवीत्**

कः अब्रवीत्?
सः अब्रवीत्
कम् अब्रवीत् ?
रामम्
रामं किम् अब्रवीत्?
वचः अब्रवीत्
किम् इति वचः?
“त्वमेव राजा धर्मज्ञः” इति

स जगाम वनं वीरो रामपादप्रसादकः ॥ 1.1.34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

**अन्वयः**

सः वीरः रामपादप्रसादकः वनं जगाम । सः आर्यभावपुरस्कृतः गत्वा महात्मानं सत्यपराक्रमं भ्रातरं रामम् अयाचत् । "त्वम् एव धर्मज्ञः राजा" इति वचः रामम् अब्रवीत् ।

रामो ऽपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।। 1.1.36 ।।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ।। 1.1.37 ।।

पदच्छेदः – रामः अपि परमोदारः सुमुखः सुमहायशाः न च ऐच्छत् पितुः आदेशात् राज्यं रामः महाबलः । पादुके च अस्य राज्याय न्यासं दत्त्वा पुनः पुनः निवर्तयामास ततः भरतं भराग्रजः ।

रामो ऽपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।। 1.1.36 ।।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ।। 1.1.37 ।।

पदपरिचयः –

रामः अपि परमोदारः = उदार-मनस्कः राघवः अपि
सुमुखः सुमहायशाः = शोभन-आननः कीर्तिमान्
न च ऐच्छत् पितुः आदेशात् = दशरथस्य निर्देशात् न इष्टवान्
राज्यं रामः महाबलः = राज्याधिकारं रामः शक्तिमान्
पादुके च अस्य राज्याय न्यासं दत्त्वा = एतस्य राजसिंहासनाय काष्ठ-निर्मित-पादत्राण-रूपं सवस्य प्रतिनिधि-स्वरूपं निक्षेप्य
पुनः पुनः निवर्तयामास = पुनः पुनः अयोध्यां प्रति प्रेषितवान्
भरतं भरताग्रजः = कैकेयी-पुत्रं रामः

रामो ऽपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।। 1.1.36 ।।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ।। 1.1.37 ।।

परमः उदारः = परमोदारः (कर्मधा)

शोभनः मुखः यस्य सः = सुमुखः (बहु.व्री)

शोभनं महत् च यशः यस्य सः = सुमहायशाः (बहु.व्री)

इष् (इच्छायाम्) लङ्-प्रपु.ए = ऐच्छत्

महत् बलं यस्य सः = महाबलः (बहु.व्री)

नि +अस् +घञ् = न्यासम् (द्वि.वि)

दा +क्त = दत्त्वा (तकारस्य द्वित्वं लेखनीयम्)

नि + वृत् + णिच् + लिट् प्र.पु.ए. = निवर्तयामास

भरतस्य अग्रजः = भरताग्रजः

पादूः, उपानत्, पादुका - अमरः

रामो ऽपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।। 1.1.36 ।।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ।। 1.1.37 ।।

न ऐच्छत्
कः?
रामः
कीदृशः रामः
परमोदारः
सुमुखः
सुमहायशाः
महाबलः
किम् न ऐच्छत् ?
राज्यं
कस्मात् न ऐच्छत् ?
पितुः आदेशात्

निवर्तयामास
कः?
भरताग्रजः
कं निवर्तयामास?
भरतम्
कथं निवर्तयामास?
पुनः पुनः
किं कृत्वा
न्यासं दत्त्वा
कीदृशं न्यासम्?
पादुके न्यासम्
किमर्थं पादुके न्यासम्?
राज्याय

रामो ऽपि परमोदारः सुमुखः सुमहायशाः ।
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।। 1.1.36 ।।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ।। 1.1.37 ।।

**अन्वयः**

परमोदारः सुमुखः सुमहायशाः महाबलः रामः अपि पितुः आदेशात् राज्यं न ऐच्छत् ।
भरताग्रजः राज्याय पादुके न्यासं दत्त्वा भरतं पुनः पुनः निवर्तयामास ।